संस्कृतवार्ताः

16/03/2025

सायम्  - 06:20

<u>मुख्यवार्ताः</u>

· न्यूज़ीलैण्डदेशस्य प्रधानमन्त्री क्रिस्टोफर लक्सन इत्येषः अद्य पञ्चदिवसात्मिकायै भारतयात्रायै नवदिल्लीं सम्प्राप्त:। सहैव लक्सन दशमस्य रायसीना-संवादस्य उद्घाटनसत्रे मुख्यातिथित्वेन भागं भजिष्यति।

· केन्द्रीय मन्त्री श्री-अश्विनी-वैष्णवः उक्तवान् यत् भारतं शीघ्रमेव हाइपरलूप्-परिवहनार्थं सज्जीभविष्यति, यतो हि सम्प्रति विकासाधीनायाः प्रौद्योगिक्याः अद्यावधि कृतेषु परीक्षणेषु आशाजनकः परिणामः प्राप्तः।

· अन्तरिक्षे अवरुद्धयोः सुनीता-विलियम्स बुच-विल्मोर इत्यनयोः प्रत्यानयनाय स्पेस-एक्स-क्रू-दशमाभियानस्य अन्तरिक्षयात्रिभिः सफलडॉकिंग-प्रक्रिया सम्पाद्य अन्ताराष्ट्रीय-अन्तरिक्ष-स्थानके प्रवेशो विहितः।

· बलूचिस्तानप्रान्तस्य नोश्की इत्यत्र बलोच मुक्तिसेनया प्रचण्डगोलिकाप्रहारेण न्यूनातिन्यूनं द्वादश-पाकिस्तानीसैनिकाः मारिताः।

· प्रसारभारती, देशे सर्वत्र हॉकीक्रीड़ाया: प्रसार-प्रचारार्थं, हॉकी-इण्डिया-जमनलाल-शर्मापुरस्कारेण सम्मानिता।

· उड़ियासाहित्यकार: रमाकान्त-रथमहोदयः अद्य प्रातः भुवनेश्वरे एकनवतितमे वयसि दिवङ्गतः।

<u>न्यूज़ीलैण्ड प्रधानमन्त्री</u>

न्यूज़ीलैण्डदेशस्य प्रधानमन्त्री क्रिस्टोफर लक्सन इत्येषः अद्य पञ्चदिवसात्मिकायै भारतयात्रायै नवदिल्लीं सम्प्राप्त:। तेन सह उच्चस्तरीय-प्रतिनिधिमण्डलमपि समागतम्, मण्डलेऽस्मिन् मन्त्रिण:, वरिष्ठाधिकारिण:, व्यापारिण:, वार्ताहराः सहैव भारतीय-प्रवासी-समुदायस्य सदस्याः

सन्ति। विदेशमन्त्रालयेन स्वीय-वक्तव्यमाध्यमेन विज्ञापितं यत् प्रधानमन्त्री नरेन्द्र-मोदी श्वः नवदिल्ल्यां न्यूज़ीलैण्डदेशस्य प्रधानमन्त्रिणा क्रिस्टोफर लक्सन इत्यमुना सह पञ्चविंशत्युत्तर-द्विसहस्रतमस्य रायसीना-संवादस्य उद्घाटनं विधास्यति। रायसीना-संवादस्य दशमं संस्करणम् श्वः आरभ्य मार्चमासस्य एकोनविंशति-दिनाङ्कं यावत् प्रचलिष्यति। श्रीमोदी न्यूज़ीलैण्डदेशस्य स्वीयसमकक्षेण सह भारत-न्यूज़ीलैण्डदेशयोः विभिन्नपक्षानाश्रित्य चर्चां साधयिष्यति। श्री लक्सन दशमस्य रायसीना-संवादस्य उद्घाटनसत्रे मुख्यातिथित्वेन भागं भजिष्यति। असौ राष्ट्रपतिभवने राष्ट्रपतिना द्रौपदी-मुर्मुः इत्यनया सहापि मेलिष्यति।

अश्विनी-वैष्णवः- हाइपरलूप्

केन्द्रीय-रेल-सूचनाप्रसारण-सूचनाप्रौद्योगिकी-मन्त्री श्री-अश्विनी-वैष्णवः उक्तवान् यत् आई.आई.टी-चेन्नै इत्यत्र दशोत्तर-चतुश्शत-मीटरात्मिका दीर्घतमा हाइपरलूप्-परीक्षणनली एशियायाः दीर्घतमा हाइपरलूप्-परीक्षणसुविधा अस्ति, यद्धि शीघ्रमेव विश्वस्य दीर्घतमा-परीक्षणसुविधा च भविष्यति। श्रीवैष्णवः ह्यः एव आई.आई.टी-मद्रास-डिस्कवरी-परिसरे हाइपरलूप्- परीक्षणसुविधायाः भ्रमणकाले दृष्टस्य सजीव-प्रदर्शनस्य दृश्य-चलच्चित्रं सामाजिकमाध्यमेषु प्रकाशयन् एतां सूचनां प्रदत्तवान् । सः विश्वासं प्रकटितवान् यत् भारतं शीघ्रमेव हाइपरलूप्-परिवहनार्थं सज्जीभविष्यति, यतो हि सम्प्रति विकासाधीनायाः प्रौद्योगिक्याः अद्यावधि कृतेषु परीक्षणेषु आशाजनकः परिणामः प्राप्तः।

स्पेस-एक्स-क्रू-दशमाभियानम्

अन्तरिक्षे अवरुद्धयोः सुनीता-विलियम्स बुच-विल्मोर इत्यनयोः प्रत्यानयनाय स्पेस-एक्स-क्रू-दशमाभियानस्य अन्तरिक्षयात्रिभिः सफलडॉकिंग-प्रक्रिया सम्पाद्य अन्ताराष्ट्रीय-अन्तरिक्ष-स्थानके प्रवेशो विहितः। एतस्मिन् अभियाने चतुर्णां अन्तरिक्ष-यात्रिणां दलं प्रेषितमस्ति। यत्र नासायाः ऐनी-मैकक्लेन, निकोल-एयर्स इत्येतौ, जाक्सायाः अन्तरिक्षयात्री ताकुआ-ओनिशी सहैव रोस्कोस्मोस इत्यस्य किरिल-पेस्कोव इत्येते सन्ति। एतेषामद्य एक्सपेडिशन-द्विसप्ततिः इत्यस्य चालकेन स्वागतं विहितम्।

## रमाकान्तरथस्य निधनम्-

उड़ियासाहित्यस्य अतीवप्रथितः आधुनिकतावादी-कविषु अन्यतमः समवाप्त-पद्मभूषणपुरस्कारः रमाकान्त-रथमहोदयः अद्य प्रातः भुवनेश्वरे एकनवतितमे वयसि दिवङ्गतः। तस्य निधनेन सम्पूर्णमपि साहित्यजगत् शोकान्धकारेण व्यापृतमस्ति । सप्तपञ्चाशदुत्तर-एकोनविंशतितमस्य आई-ए-एस-अधिकारी रमाकान्त-रथः ओडिशायाः मुख्यसचिवत्वेन सेवाकार्यम् अनुष्ठितवान् सहैव केन्द्र-सर्वकारस्यापि विविधेषु पदेषु कार्यरतस्सन् तेन स्वकीयं योगदानं प्रदत्तम्। तेन अष्टनवत्युत्तर-एकोनविंशतिवर्षादारभ्य त्र्यधिक-द्विसहस्रतमवर्षं यावत् भारतीय-साहित्याकादम्यां अध्यक्षरूपेणापि कार्यं कृतम्। राष्ट्रपतिपदासीना-द्रौपदीमुर्मुः प्रख्यात-उड़ियाकवेः रमाकान्तरथस्य निधनमालक्ष्य दुःखं प्रकटितवती। स्वकीये सन्देशे राष्ट्रपतिना कथितं यत् रमाकान्त-रथ: भारतीय साहित्यजगत: कश्चन प्रमुखः व्यक्तिः आसीत्। राष्ट्रपतिना प्रोक्तं यत् प्रख्यातकविना उड़ियासाहित्ये अविस्मरणीय-योगदानेन अखिल-भारतीय-साहित्यं समेधितम्। ओडिशायाः मुख्यमन्त्रिणा मोहन-चरण-माझी इत्यमुनापि रमाकान्त-रथमहोदयस्य निधनमालक्ष्य स्वकीयः सन्तापः प्रकटीकृतः । तेन प्रख्यापितं यत् रमाकान्तमहोदयेन राष्ट्रीयान्ताराष्ट्रीय-स्तरे ओडियासाहित्यस्य गौरवं संवर्धितम्। केन्द्रीयमन्त्री धर्मेन्द्र प्रधानः, जुएल ओराम, सहैव अन्ये गणमान्याश्चापि रमाकान्तमहोदयस्य निधनमालक्ष्य शोकं प्रकटितवन्तः।

## प्रसारभारती- हॉकी

नवदिल्ल्याम् आयोजिते हॉकी-इण्डिया-सप्तम-वार्षिक-पुरस्कारः-विंशति-चतुर्विंशति: इत्यस्मिन् स्वस्य अमूल्ययोगदानस्य कृते प्रसारभारती, हॉकी-इण्डिया-जमनलाल-शर्मापुरस्कारेण सम्मानिता। एषः पुरस्कारः राष्ट्रे हॉकीक्रीडायाः प्रचार-प्रसारणे प्रसारभारत्याः अमूल्ययोगदानं प्रयासं च चिह्नीकरोति । समारोहेऽस्मिन् हॉकी-इण्डिया-संस्थया, हॉकी-इण्डिया-मेजर-ध्यानचन्द-आजीवन-उपलब्धिपुरस्कारेण सहैव पञ्चाशत्-लक्षरूप्यकाणां धनराशिपुरस्सरं, पञ्चसप्तत्यधिक-नवदशशत-तमे वर्षे विश्वचषकस्य विजयी-दलस्य सदस्यानाम् अभिनन्दनं कृतम्। शीर्षसम्मानितेषु सविता-पुनिया, हरमनप्रीतसिंहः च महिला-पुरुष-वर्गेषु विंशति-चतुर्विंशति-तमवर्षस्य उत्तम-क्रीडक-रूपेण हॉकी-इण्डिया-बलबीरसिंह-वरिष्ठ-पुरस्कारेण सम्मानितौ। स्ववक्तव्ये प्रसारभारत्याः अध्यक्षः नवनीत-सेहगलः उक्तवान् यत् देशे सर्वत्र हॉकी-क्रीडायाः प्रसारप्रचारः प्रसारभारत्याः मुख्योद्देश्यं वर्तते।

अमितशाहः

केन्द्रीय-गृहसहकारितामन्त्री अमितशाहः असमराज्यस्य कोकराझार-स्थलं सम्प्राप्तवान्। बोडो-प्रादेशिकक्षेत्रे निवसद्भिः विविध-सांस्कृतिकदलैः स्वीयसांस्कृतिक-परम्परायाः प्रदर्शनपूर्वकं श्रीशाहस्य स्वागतमाचरितम्। श्रीशाहः मिज़ोरम-यात्रानन्तरं गुवाहाटीस्थलस्य लोकप्रिय-गोपीनाथ-बोरदोलोई-अन्ताराष्ट्रीय-विमानपत्तने अगच्छत् , यत्र असमस्य मुख्यमन्त्री डॉक्टर हिमन्ता-बिस्व-सरमा अन्ये गणमान्याश्च तस्य स्वागतं कृतवन्तः।

पाकिस्तानीसैनिकाः मृताः

बलूचिस्तानप्रान्तस्य नोश्की इत्यत्र एन-चत्वारिंशत् इति राजमार्गे, रक्षानी-मिल-क्षेत्रे, फ्रन्टियर-कॉन्स्टेबुलरी इति सैनिकान् वहन्तस्य बसयानस्य उपरि प्रचण्डगोलिकाप्रहारेण न्यूनातिन्यूनं द्वादश-पाकिस्तानीसैनिकाः मृताः, षड्विंशत्यधिकाः व्रणिताश्च अभवन् । आक्रमणस्यानन्तरं चिकित्सालयेषु आपत्कालीनपरिहाराः प्रचालिताः, एफ.सी-मुख्यालयस्य अन्तर्बहिश्च एम्बुलेन्स-यानानि च दृष्टानि। बी.एल.ए. इति बलोच्-मुक्तिसेनया, पाकिस्तानि-सेनायाः समूहोपरि घातकप्रहारस्य उत्तरदायित्वं स्वीकृत्य, अद्यावधि न्यूनातिन्यूनं नवति-सैन्यकर्मचारिणः मारिताः इति उद्घोषितम् । पाकिस्तानस्य सैन्याधिकारिणः एतावत्पर्यन्तं बीएलए-इत्यस्य नूतन-घोषणायाः कृते प्रतिक्रियां न दत्तवन्तः।

।। इति वार्ता:।।